पेसनीयम् , पेसनीयम् , पिपेसिषणीयम् , पेपेसनीयम् ;
पेस्यम् , पेस्यम् , पिपेसिष्यम् , पेपेस्यम् ;
ईषत्पेसः-दुष्पेसः-सुपेसः ; —
पेस्यमानः, पेस्यमानः, पिपेसिष्यमाणः, पेपेस्यमानः ;
पेसितुम् , पेसयितुम् , पिपेसिषितुम् , पेपेसितुम् ,
पेसा, पेसना, पिपेसिषा, पेपेसा ;
पेसनम् , पेसनम् , पिपेसिषणम् , पेपेसनम् ;
पेसित्वा, पेसयित्वा, पिपेसिषित्वा, पेपेसित्वा ;
प्रपेस्य, प्रपेस्य, प्रपिपेसिष्य, प्रपेपेस्य ;
पेसम् २, } पेसम् २, } पिपेसिषम् २, } पेपेसम् २ ; }
पेसित्वा २, } पेसयित्वा २, } पिपेसिषित्वा २, } पेपेसित्वा २. }

(1062) " पै शोषणे " (I-भ्वादिः-920. अक. अनि. पर.)

' पाने पिबति, रक्षायां पाति, पायति शोषणे ॥ ' (श्लो. 5) इति देवः ।

[1]पायकः-यिका, [2]पायकः-यिका, पिपासकः-सिका, [3]पापायकः-यिका ;
पाता-पात्री, पाययिता-त्री, पिपासिता-त्री, पापायिता-त्री ;
[4]पायन्-न्ती, पाययन्-न्ती, पिपासन्-न्ती ; —
पास्यन्-न्ती-ती, पाययिष्यन्-न्ती-ती, पिपासिष्यन्-न्ती-ती ; —
[5]व्यतिपायमानः, पाययमानः, व्यतिपिपासमानः, पापायमानः ;
व्यतिपास्यमानः, पाययिष्यमाणः, व्यतिपिपासिष्यमाणः, पापायिष्यमाणः,
पाः-पौ-पः ; — — —

1. ' आतो युक् चिण्कृतोः ' (7-3-33) इति युगागमः । एवं घञ्प्रत्यये, णमुलि च युगागमो ज्ञेयः ।
2. ' शाच्छासाह्वाव्यावेपां युक् ' (7-3-37) इति ण्यन्ते सर्वत्र युगागमः । आदन्तलक्षणपुगागमस्यापवादः । सूत्रेऽत्र लाक्षणिकस्यापि पाधातोरस्य ग्रहणम् इति व्याख्यातारः ।
3. ' गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम् ' (वा. 2-4-77) इति वचनात् ईत्वविधायके सूत्रे यङन्ते, नास्य ग्रहणमिति क्तप्रत्ययादिषु च ईत्वमस्य धातोर्नेति ज्ञेयम् । तेनैवं रूपम् ।
4. '—अशिति ' (6-1-45) इत्युक्तत्वादात्त्वं न । तेन शतरि आयादेशे रूपमेवम् ।
5. कर्मव्यतीहारे शानच् । एवं सन्नन्तेऽपि प्रकृतेरात्मनेपदनिमित्तमेव शानजिनमित्तमिति ज्ञेयम् ।